M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Set. 554

Title: Pārāyaṇa Prayoga

854

854

उपनयन प्रयोगः from प्रयोग रत्न

Upanayana Prayoga from Prayoga Ratna	Title
	Author
	Editor
	Year, Vols.
	Publisher
854	Remarks

854

श्रीगणेशायनमः॥ श्रीसीतारामचंद्रायनमः। अथोपनयनप्रयोगः। उक्तकालेउपनिनीषुराचार्यःपू
र्वेद्युर्बटोःपरिधानार्थमकृमिषद्धौतंनवंसदशंपरेणाधृतंवस्त्रमुत्तरीयार्थंकषायवस्त्रमजिनंवाऽ
लमगस्ययज्ञोपवीतंमौंजींमेखलांचपालाशमव्रणंऋजुंसौम्यदर्शनंबटोःकेशसंमितंसायंदंडं
कौपीनंतद्बंधनंसूत्रंभिक्षाभाजनंचसंपाद्यस्वस्योपनेतृत्वाधिकारसिद्धयेकृच्छ्रत्रयंद्वादश
सहस्रगायत्रीजपंचकृत्वाकुमारेणापिकामचारकामवादकामभक्षणादिदोषापनोदार्थंकृ
च्छ्रत्रयंकारयित्वास्वस्तिवाचनांकुरार्पणग्रहयज्ञंनांदीश्राद्धानिसंकल्पपूर्वकंकृत्वामंडपप्रतिष्ठां
कुर्यात्। तत्रसंकल्पः। अस्यकुमारस्योपनयनेग्रहानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग्रह
यज्ञंकरिष्ये। ग्रहयज्ञंसंपाद्यास्यकुमारस्यद्विजत्वसिद्ध्यावेदाध्ययनाधिकारार्थंमुपनय
नंकरिष्ये। तदंगभूतमादौगणपतिपूजनपूर्वकंस्वस्तिवाचनपूर्वकंनांदीश्राद्धंमंडपप्रतिष्ठां
कुलदेवतास्थापनंचकरिष्ये। उपनयनेनसहचौलकरणपक्षेतदपिसंकल्पेकीर्तयेत्। तंत्रे
णस्वस्तिवाचनग्रहयज्ञनांदीश्राद्धादीनिकुर्यात्। अथापरेद्युः कृतनित्यक्रियः कृतमंग
लस्नानेमवकृतंकुमारंउक्तस्वस्त्ययनंकृतकौतुकबंधंभोजयित्वादेशकालौसंकीर्त्यअ
स्यकुमारस्योपनयनंकर्तुंतत्प्राच्यांगभूतंवपनादिकरिष्येइतिसंकल्प्यकृतवपनं
स्नापितंबद्धशिखंकुमारंमौहूर्त्तिकोक्तशुभमुहूर्त्तेस्वसमीपमानीयतन्मुखंसम्य
गीक्षेत। ततस्तंस्वदक्षिणतउपवेश्योपलेपनाद्यग्निप्रतिष्ठापनांतंकृत्वासमिद्ध

यमाद्यायतिथ्यादिकमुक्त्वाऽऽचार्योऽस्यकुमारस्यद्विजत्वसिद्ध्यर्थंक्रियमाणेउपनयनहोमेदे
वतापरिग्रहार्थमन्वाधानंकरिष्ये। अस्मिन्नन्वाहितेऽग्नावित्याद्याधारावाज्येनेत्यंतमुक्त्वा
त्रिरग्निंपवमानंप्रजापतिंचाज्येनशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वाव्याहृ
तिभिरन्वाधायपरिसमूहनाद्याज्यसंस्कारांतंकृत्वाचार्योऽग्नेःपश्चादवस्थाप्यकुमारं
प्राङ्मुखमवस्थाप्यकौपीनार्थंत्रिवृतंकार्पाससूत्रंकटावाबध्यकौपीनंपरिधाप्य
द्वितीयंजन्मनस्तुल्यप्रतिनिधिभूतंमहतंशुक्लंवासःपरिधाप्यान्येनतथैवकाषायंवा
ससातथैवप्रावरयेत्। तत्रमंत्रः। युवंवस्त्राणीत्यस्यऔचथ्योदीर्घतमामित्रावरुणौ
त्रिष्टुप्। वासोधारणेविः। ॐ युवंवस्त्राणिपी०२। प्रावरणार्थंकृष्णाजिनंवातच्चत्र्यंगु
लंतुबहिर्लोमयद्वास्याच्चतुरंगुलं। अजिनंधारयेद्द्विजश्चचतुर्विंशाष्टषोडशैः। मित्रस्य
चक्षुरित्यस्यवामदेवोऽजिनंत्रिष्टुप्। अजिनधारणेविः। [illegible] मित्रस्यचक्षुर्धरुणंबलीय
स्तेजोयशस्विस्थविरंसमृद्धं। अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं। ततो
द्विजत्वचिह्नार्थंयज्ञोपवीतंदद्यात्। यज्ञोपवीतमित्यस्यपरब्रह्मचपरमात्मात्रिष्टुप्
श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणेविनियोगः। ॐ यज्ञोपवीतंप०
इमंमंत्रंवाचयित्वातद्दक्षिणबाहुमुद्धृत्योपवीतंधारयित्वाकुमारमात्मनोऽग्नेश्चम

श्रीगणेशायनमः॥श्रीसीतारामचंद्रायनमः। अथोपनयनप्रयोगः। उक्तकालेउपनेताचार्यःपू
र्वेद्युर्बटोःपरिधानार्थंशुक्लमिश्रंक्षौतंनवंसदशंपरेणाध्वृतंवस्त्रमुत्तरीयार्थंकषायवस्त्रमजिनंवासं
हृमृगस्ययज्ञोपवीतंमौंजींमेखलांचपालाशमदण्डंऋजुंसौम्यदर्शनंबटोःकेशसंमितंसार्धदंडं
कौपीनंतद्बंधनंसूत्रंभिक्षाभाजनंचसंपाद्यस्वस्योपनेतृत्वाधिकारसिद्धयेकृच्छ्रत्रयंद्वादश
सहस्रगायत्रीजपंचकृत्वाकुमारेणापिकामचारकामवादकामभक्षणादिदोषापनोदार्थंकृ
च्छ्रत्रयंकारयित्वास्वस्तिवाचनांकुरार्पणग्रहयज्ञनांदीश्राद्धानिसंकल्पपूर्वकंकृत्वापंडपप्रतिष्ठां
कुर्यात्। तत्रसंकल्पः। अस्यकुमारस्योपनयनेग्रहानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग्रह
यज्ञंकरिष्ये। ग्रहयज्ञंसंपाद्यास्यकुमारस्यद्विजत्वसिद्ध्यावेदाध्ययनाधिकारार्थंश्चउपनय
नंकरिष्ये। तदंगभूतमद्यगणपतिपूजनपूर्वकंस्वस्तिवाचनपूर्वकंनांदीश्राद्धंपंडपप्रतिष्ठां
कुलदेवतास्थापनंचकरिष्ये उपनयनेनसहचौलकरणपक्षेतदपिसंकल्पेकीर्तयेत्। तंत्रे
णस्वस्तिवाचनग्रहयज्ञनांदीश्राद्धादीनिकुर्यात्। अथापरेद्युः कृतनित्यक्रियःकृतमंग
लस्नानमलंकृतंकुमारंउक्तस्वस्त्ययनंकृतकौतुकबंधंभोजयित्वादेशकालौसंकीर्त्यअ
स्यकुमाकुमारस्योपनयनंकर्तुंतत्राद्यांगभूतंवपनादिकरिष्येइतिसंकल्प्यकृतवपनं
स्नापितंबद्धशिखंकुमारंमौहूर्तिकोक्तशुभमुहूर्तेस्वसमीपमानीयतन्मुखंसम्य
गीक्षेत। ततस्तंस्वदक्षिणतउपवेश्योपलेपनाद्यग्निप्रतिष्ठापनांतंकृत्वासमिद्ध

यमाद्दायतिथ्यादिकमुच्चार्यास्यकुमारस्यद्विजत्वसिद्ध्यर्थंक्रियमाणेउपनयनहोमेदे
वतापरिग्रहार्थमन्वाधानंकरिष्ये। अस्मिन्नन्वाहितेग्नावित्याद्याघारावाज्येनेत्यंतमुक्त्वा
त्रिरग्निंपवमानंप्रजापतिंचाज्येनशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वाव्याहृ
तिभिरन्वाधायपरिसमूहनाद्याज्यसंस्कारांतंकृत्वाचार्योग्नेःपश्चादवस्थापकुमारं
प्राङ्मुखमवस्थाप्यकौपीनार्थंत्रिवृतंकार्पाससूत्रंकटावाबध्यकौपीनंपरिधाप्या
द्वितीयंजन्मन्युत्वग्रंथितनिधिपूतंमहतंशुक्लवासः(सदशं)परिधाप्यान्येनतथैवकाषायंवा
ससातथैवप्रावरयेत्। तत्रमंत्रः। सुवंवस्त्राणीत्यस्यऔचथ्योदीर्घतमामित्रावरुणौ
त्रिष्टुप्। वासोधारणेविनि। ॐ सुवंवस्त्राणिपी०२। प्रावरणार्थंकृष्णाजिनंवातच्चर्म्यंगु
ळंतुबहिर्लोमियद्वास्याच्चतुरंगुळं। अजिनंधारयेद्द्विजप्रचतुर्विंशाष्टषोडशैः। मित्रस्य
चक्षुरित्यस्यवामदेवोजिनंत्रिष्टुप्। अजिनधारणेवि०। मित्रस्यचक्षुर्धरुणंबलीय
स्तेजोयशस्विस्थविरंसमृद्धं। अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं। ततो
द्विजत्वचिह्नार्थंयज्ञोपवीतंतद्यात्। यज्ञोपवीतमित्यस्यपरब्रह्मचपरमात्मात्रिष्टुप्।
श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणेविनियोगः। ॐ यज्ञोपवीतंप०
ध्येमंत्रंवाचयित्वाततद्दक्षिणबाहुमुद्धृत्योपवीतंधारयित्वाकुमारमात्मनोग्नेश्चम

ध्येनयज्ञपात्रोत्तरस्यागंगमयित्वा तत्रैक विधिवद्। चम्यपुनस्तथैवानीयस्व दक्षिणत उ
पवेश्य बर्हिरास्तरणादिस्त्रुव संमार्जनान्तं कृत्वा ब्रह्मचार्यन्वारब्ध इध्माधाना घारौ
तमाज्यभागवर्जं कुर्यात्। ततः अग्न आयूंषि पवस इति तिसृणां शतं वैखानस ऋषयः। अग्निः
पवमानो देवता। गायत्री छंदः। उपनयन प्रधानाज्यहोमे विनियोगः। ॐ अग्न आयूंषि०
अग्नये पवमानायेदं न ममेति त्यागः। एवमग्रेपि। अग्निर्ऋषिः प०। अग्ने पवस्व०।२। प्र
जापत इत्यस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। उपनयनप्र०। ॐ व्रतापते न त्वदेता०।४
अथाचार्योग्नेरुत्तरतः प्राङ्मुख स्तिष्ठन् कुमारोप्याचार्ययोर्मध्ये नगत्वाचार्या
भिमुखस्तिष्ठेत्। अथाचार्यः संयतासु कुमारस्य शुचि त्वसिद्ध्यै सवितृदेवता तत्प
त्नयेचांजलिक्षालनं कुर्यात्। तत्रैव स्वं शुद्धोदकेन सिष्यांजलिमापूर्य स्वस्यांजलि
मन्येनपूरयित् तत्सवितुः श्यावाश्वः सविता। त्रिष्टुप्। अंजलिक्षारणे वि०। ॐ
तत्सवितुर्वृणीमहे वयं देवस्य भोजनं। श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥
अनेन स्वांजल्युदकं शिष्यांजलौ प्रक्षारयेत् अञ्जलं कुमारांजलिनेवा क्षारयेत्।
ततः शिष्य त्वसिध्यर्थं बटोर्हस्तं गृह्णीयात्। मंत्रः। देवस्य त्वा सवितुः प्रसवेश्विनोर्बा
हुभ्यां पूष्णोहस्ताभ्यां हस्तं गृह्णामि असौ x तियजुरंते अमुकशर्मन्निति कुमारस्याभि

वादनीकं नामशर्मांतं संबुध्य निर्दिश्य दक्षिणेन पाणिना कुमारस्य सांगुष्ठं दक्षिणं पाणिं गृहीत्वा पुनरपि
उदकपूरणादि कृत्वा सविता ते हस्तमग्रभीदिति मंत्रांते पूर्ववद् बटुनामोक्त्वा हस्तं गृहीत्वा पुनरपि उदक
पूरणादि कृत्वा अग्निराचार्यस्तवेति मंत्रांते पूर्ववत्तं नाम निर्दिश्य हस्तं गृह्णीयात्। अथाचार्यो ब्रह्मचा
रिणा सह निष्क्रम्य देव सवितरेष ते ब्रह्मचारी तं गोपाय स मा मृतेत्युच्चार्य संरक्षणार्थं व्रतपतये आदित्या
यबटुं ददामीति मनसा स्मरन् ब्रह्मचारिणमादित्यमीक्षयेत्। ततउभावपि पूर्ववदुत्तरतो येरन्योन्याभि
मुखौ तिष्ठेतां। अथाचार्यः कस्य ब्रह्मचार्यसि। प्राणस्य ब्रह्मचार्यसि। कस्त्वा कमुपनयते काय त्वा परिद
दामीति मंत्रं जपन् कुमारं प्रजापतये संरक्षणार्थं मनसा समर्प्य। युवा सुवासा इति मंत्रस्य कौशिको विश्वामि
त्रो [illegible] त्रिष्टुप्। पूर्वार्धस्य दक्षिणावर्तेन उत्तरार्धस्य पाणिभ्यां पदु हृदयालंभने विनियोगः। ॐ युवा सु
वासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंतः। इत्युच्चार्य
x इति अर्धर्चं उच्चारयन् बटुं प्रदक्षिणमावर्त्य प्राङ्मुखमवस्थापयेत्। ततः कुमारांसयोरुपरि स्वपाणी गमयित्वा x
तद्धृदय प्रदेशं सकृत्पाणिभ्यां स्पृशेत्। ततो बटुरग्नेः पश्चिमतः परिसमूहन पर्युक्षणे कृत्वा [illegible]कारमे
वकृत्वा अग्नये समिधमित्यस्य हिरण्यगर्भोग्निस्त्रिष्टुप् समिदाधाने विनियोगः। ॐ अग्नये समि०
इति समिधमाधाय अग्नय इदं न ममेति त्यागः कृत्वा पाणिं प्रक्षाल्याग्निं स्पृष्ट्वा तेजसा मा समन
मुखं ज्मीति संभूतो छद् यमं वाङ्मि ततः पाणिं प्रक्षाल्य पुनरग्निं स्पृष्ट्वा मंत्रेण तथैव मुखं निमृज्य पाणिं प्रक्षाल्या
ग्निं स्पृष्ट्वा मंत्रेण तथैव मुखं निमृज्य पाणिं प्रक्षालयेत्। ततस्तिष्ठन् प्रणतिमुद्रां कृत्वा मयि मेधामिति
पंचानां हिरण्यगर्भ ऋषिः। पूर्वेषां त्रयाणां अग्नीन्द्रसूर्या देवता उत्तरेषां त्रयाणामग्निर्देवता गायत्री छंदः

अग्न्युपस्थाने विनियोगः॥ ॐ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु। मयि० मयीन्द्र इन्द्रियं दधातु। मयि०
मयि सूर्यो भ्राजो दधातु। यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं। वर्चस्व० हरस्व० इति षण्मंत्रैरग्निमुपस्था
य मानस्तोक इत्यस्य कुत्सो रुद्रो जगती। विभूति धारणे। ॐ मानस्तोके तनये० इत्यनेन भस्म मादाय
यथाचारं त्र्यायुषं जमदग्नेरिति ललाटे। कश्यपस्य त्र्यायुषं इति कंठे। अगस्त्यस्य त्र्यायुषमिति ना
भौ। यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे। तन्मे अस्तु त्र्यायुषमिति वाम स्कंधे। सर्वमस्तु शतायुषमि
ति शिरसि भस्म धारयेत्। पुनः परिसमूहन पर्युक्षणे कृत्वा कृतांजलिस्तिष्ठेत्। ॐ च मे स्वरश्च मे इति।
स्वस्ति श्रद्धां मेधामित्युपस्थाय अग्नेरुत्तरतो गत्वा प्राङ्मुखी भूयादाचार्याभिमुखो भूत्वा दक्षिणं
जानुं भूमौ निधाय पाणिभ्यां यथासव्यं दक्षिणं श्रोत्रं संस्पृश्य व्यस्त पाणिराचार्यस्य दक्षिणपादं
स्वदक्षिणहस्तेन सव्यं च सव्यहस्तेन जानुप्रभृति पादपर्यंतं स्पृष्ट्वा अमुकगोत्रामुकशर्माहं भो अ
भिवादय इत्युक्त्वा येन शिरो नवति पूर्वकमभिवाद्य आचार्येणायुष्मान् भव सोम्य देवदत्तेति प्रयुक्ता
शीर्वादो विनयानवतिं कृत्वा सावित्र्युपदेशं वांछन् धीहि भोः सावित्रीं भो अनुब्रूहीति आचार्य
प्रत्युक्त्वा वामपाणिमुत्तानी कृत्य दक्षिणं पाणिं न्युब्जीकृत्य संधाय पाणिपृष्ठमंगुला
न्यंगुष्ठौ कृत्य कृतं ब्रस्तांजलिं दक्षिणांके निक्षिप्याचार्यांतिक आसीत। अथाचार्यस्तदं
जलिं तत्परिधाय वाससा स्वपाणिभ्यां तदंजलिं परिगृह्य प्रणवव्याहृतिपूर्वकं सावि ३

त्रीं प्रथमं पादशः स्वयमुक्त्वा वाचयेत्। ततोऽर्धर्चशः ततः समस्तां एवं ग्रहणाशक्तौ यथाशक्ति स्वयमुक्त्वा वाचये
येत्। तत्र यथा प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छंदः व्याहृतिमंत्रस्य प्रजापतिः प्रजापतिर्बृहती। गाय
त्र्या विश्वामित्रः सविता गायत्री उपनयने विनियोगः॥ गायत्रीं त्रिर्वाचयेत्। ततः मम व्रते इति मंत्रस्य प्रजापतिर्ऋषिः।
बृहस्पतिर्देवता। त्रिष्टुप् छंदः बटोर्हृदये ऊर्ध्वांगुलिपाणि निधाने विनियोगः॥ ॐ मम व्रते हृदयं ते दधामि मम चि
त्तमनुचित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति स्वपाणिमूर्ध्वांगुलिं ब्रह्म
चारिणो हृदयप्रदेशे निधाय तस्य रक्षार्थं शुध्यर्थं च मेखलां मंत्रेण बध्नीयात्। इयं दुरुक्तादिति द्वयोर्वामदेवो मे
खला त्रिष्टुप् मेखलाबंधने वि० इयं दुरुक्तात्परिबाधमाना शर्म वरूथं पुनती न आगात्। प्राणापानाभ्यां बल
माभरंती प्रिया देवानां सुभगा मेखलेयं। ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः सहमाना अरातीः। सा नः सम
न्तमनु पर्येहि भद्रया। भर्तारस्ते मेखले मा रिषामेति वाचयित्वा मेखलां त्रिरावृत्य नाभिप्रदेशे ग्रंथित्रयं कुर्यात्
तदा बटुः रहस्यांगसहितवेदत्रयेणावृतोऽहमिति मन्येत ततः कार्यमस्य योगक्षेमार्थं अधर्मनिवृत्तये च केशसं
मितं पालाशं दंडं दद्यात् स्वस्ति नो मिमीतामित्यस्य स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप् दंडदाने वि० ॐ स्वस्ति नो०
तद्गृह्णीयाद्वटो मंत्रं। अदांतं दमयित्वा मां मार्गे संस्थापयन्स्वयं। दंडः करे स्थितो यस्य तस्माद्गृह्ण यतो भयं इति वा
चयेत्। कुमारस्याचारमादिशेत्। ब्रह्मचार्यसि आचमनं कुरु मूत्रपुरीषादौ शुध्यर्थमित्यर्थः। कर्म कुरु सं
ध्योपासनादीत्यर्थः दिवा मा स्वाप्सीः आचार्याधीनो वेदमधीष्व सायं प्रातर्भिक्षेथाः सायं प्रातः समिधमा
धेहि। द्वादशवर्षाणि वेदग्रहणांतं वा ब्रह्मचर्यं चरेति संपाद्य बोधयेत्। ततः स्विष्टकृदादिहोमशेषं समा
प्याग्निं मेधाजननीं तं रक्षेत्। तत्रैव सायंप्रातरग्निकार्यं कुर्यात्। ततोऽनुप्रवचनीयहोमं ब्राह्मणभोज
नीयपर्याप्तं तंडुलरूपां भिक्षां याचेत। तत्र क्रमः भिक्षापात्रमादाय आदौ मातरं भवति भिक्षां ददातु।

इति एवं मातुः स्वसारं स्व भगिनीमन्यामपि स्वशाखाध्यायिन अप्रत्याख्यायिनमप्रत्याख्यायिनीश्च या च
यित्वा भैक्षमाचार्याय निवेद्य मध्याह्नसंध्यां कुर्यादिति प्रयोगपारिजातः नेति कृष्णभट्टीकारः। ब्राह्मणत्रि
षां ग्रहणं देशतः शतं वा ब्राह्मणा उपनयने भोजनीयाः ततो गुरुः सन्निधाववन्नकुशकंडिकातः शेषं नीत्वा वं
दित सायंसंध्या औपनायमिकाग्नेरंतिकं गत्वासीनः प्राणानायम्य सायमग्निकार्यं करिष्य इति संकल्प्य परिस
मूह्य पर्युक्ष्य पूर्ववत् समिधमाधाय त्रिः सुरवं पूर्ववदनग्ने ज्योतिष्मंत्रैरुपस्थाय मानस्तोक इति विभूतिमादाय त्र्या
युषमिति तत्तत्स्थानेषु धृत्वा पुनः परिसमूह पर्युक्षणे कृत्वा कृतांजलिरोंच मे इति उपस्थानं॥ अथाचार्यो समि
तेऽग्नेः पश्चात्स्वासीनः प्राणानायम्य ब्रह्मचारिणं स्वदक्षिणत उपवेश्य तिथ्यादिकीर्तनं कर्तुं उपनयनांगभूतमनु
प्रवचनीयहोमं करिष्य इति संकल्प्याद्य करि[ष्य]माणोऽनुप्रवचनीयहोमे देवतापरिग्रहार्थमन्वाधानं करि
ष्ये अस्मिन्नन्वाहितेऽग्नावित्याद्याघारावाज्येनेत्यंतमुक्त्वा सदसस्पतिं सवितारं ऋषीनिति प्रधानदेवता
श्चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वा भूर्भुवः स्वः स्वाहेति द्वे समिधौ हुत्वा परिसमूहना
दि प्रणिप्रणयनांतं कृत्वा तद्दक्षिणा द्रव्यं चतुरश्चतुरो मुष्टीन् देवतात्रयस्य ब्राह्मणत्रय भोजनस्य पर्याप्तं नि
रूप्य त्रिः फलीकृत्य त्रिः प्रक्षाल्य श्रपयित्वा अतः स्थालीपाकद्वयाचार्याय निवेदयेद्बटुः। बटुरेव [?]रणाश
क्तौ तद्बंधुनान्येन वा कारयेत् ततो ब्रह्मचारिणान्वारब्धो गुरुः आज्यसंस्कारांतं कृत्वा प्रधानहोमं कुर्यात् अव
दानधर्मेणावदाय। सदसस्पतिमित्यस्य काण्वो मेधातिथिः सदसस्पतिर्गायत्री अनुप्रवचनीयप्रधा
नचरुहोमे विनियोगः ॐ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं सनिं मेधामयासिषं स्वाहा सदसस्पतय
इदं न मम तत्सवितुरित्यस्य गाथिनो विश्वामित्र ऋषिः सविता गायत्री अनुप्रवचनीय प्रधानच० ४

ॐ तत्सवितुर्वरेण्यं भ० सवित्र इदं न मम। ऋषिभ्यः स्वाहा ऋषिभ्य इदं न मम। एवं त्रिभिर्मंत्रैर्हुत्वा स्विष्टकृतादि हो
मशेषं समापयेत् वशिष्ठाग्नेर्नय वरान्ब्राह्मणान्भोजयित्वा तैर्वेदसमाप्तिं वाचयेत्। ततो ब्रह्मचारी अ
क्षारलवणं भुक्त्वाधः शयीत मेधाजननं यावद्देवगुरुं प्रसादयन्चरेत्। यदा गर्जितानध्यायशंका तदा दिवे
व चरुं श्रपयेत् होमस्तु सायंसंध्योत्तरमेव तस्मान्नानध्यायदोषः तदुक्तं संग्रहे। न संध्यागर्जकालेन दृष्ट्युपा
तद्दूषितो। ब्रह्मौदनं पचेद्दक्षिपक्कं चेन्न निवर्तते इति॥ इत्युपनयनानुप्रवचनीयप्रयोगरत्नस्थप्रयोगः॥
अथ मेधाजननं। तिथ्यादिकं संकीर्त्य मम कुमारस्योपनयनव्रतसमाप्तिवेदग्रहणसामर्थ्यलक्षणमेधा
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं मेधाजननाख्यं कर्म करिष्ये इति संकल्प्य शौनकमतेन पुण्याहवाचनसमा
निं कृत्वा मेधाजननकर्मणि पूर्वोक्तफलसिद्ध्यर्थं मेधापरमनामकसावित्रीपूजां करिष्ये इति संकल्प्य प
लाशशाखायां मेधायेन म इति नाममंत्रेणावाहनादिषु उपचारान् कृत्वा यावत्सकृत्कुमारकमिश्रमन्त्रं
निवेद्य पुनश्च पूर्ववदभ्यर्च्य ब्रह्मचारिणा प्रणाम्य शुद्धजलपात्रोदकेन सेचनं कुर्वता बटुना त्रिः प्रदक्षिणां
कारयन् मंत्रं वाचयन् प्रणमेच्च। ॐ सुश्रवः सुश्रवा असि प० इत्यासमिति प्रतिप्रदक्षिणं मंत्रावृत्तिः प्रणामं
चकारयेत्। त्रिः प्रदक्षिणोत्तरं। ततो ब्रह्मचारी स्नात्वा नवानि यज्ञोपवीतानि नमेखलादंडं नवमुपनयनावत्
धृत्वा पुराणानि पलाशसन्निधौ विसृज्य पूर्वं धृतवाससी गुरवे दत्वा मेधामह्यमिति सूक्तं विप्रैः पाठयि
त्वा विधिवत्स्वस्ति वाचनं कृत्वा ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा तान्भोजयित्वा नमस्कृत्याशिषो गृ
ह्णीयात्। ॐ मेधामह्यमंगिरसो मे धां० इति मेधामह्यं सूक्तं॥ इति मेधाजननप्रयोगः॥

अथ समावर्तनं। ब्रह्मचारी कृतनित्यक्रियः कृतप्रातरग्निकार्यश्च प्राणानायम्य तिथ्यादि संकीर्त्य मम गृहस्थाश्र
मांतरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तये। ब्राह्मणाय गोदत्वा पी ब्राह्मणान्भोजयित्वा विधिवत्कौतुकमाबध्य स्
नकाले स्थंडिलोल्लेखनाद्युपनाद्यग्निप्रतिष्ठापनांतं कृत्वा पुनर्देशकालौ संकीर्त्य तया क्रियमाणसमावर्तनहोमे देवता
परिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहित इत्याग्नाविल्या याघारावाज्येनेत्यंतमुक्त्वा त्रिरग्निं पवमानं प्रजाप
तिं चैताः प्रधानदेवता आज्यद्रव्येण अग्निं सूर्यं समिधा विश्वान्देवान्दश समिद्भिः शेषेण स्विष्टकृतमि
त्यादि सद्योयक्ष्य इत्यंतमुक्त्वा समिद्द्वयमग्नावाधाय पूर्णपात्रनिधानाद्याद्यपुरस्तात्तंत्रमनुष्ठायाग्नेर
ग्नेरास्तीर्णेषु दर्भेषु व्रीहियवमाषतिलैः पृथक्पृथक्पूरितानि चत्वारि शरावाण्येकैकशः प्राक्संस्थमासा
दयेत्। ताम्रमयं वा लोहं वा क्षुरं शीतोष्णमुदकं नवनीतं दधिप्सो इं अण्णाद्येकादर्शाद्व्याग्नेरुत्तरतो आ
सादयेत्। ततः प्रत्यगग्नेरासीनस्य कर्तुर्दक्षिणतो माता प्राङ्मुख्यासीत तस्याः पुरतोऽग्नेः पश्चादेक
स्मिन्शरावे शमीपर्णान्यपरस्मिन्नानडुहं गोमयं आसादयेत्। ततो ब्रह्मैकविंशतिकुशानुदधानो मातु
र्दक्षिणतस्तिष्ठेत्। ततो ब्रह्मचारी पुरस्तन्नमाघारांतं तंत्रं कृत्वा अग्न आयूंषीति तिसृणां शतं वैखानस अ
ग्निः पवमानो गायत्री। प्रधानाज्यहोमे। अग्नये पवमानायेदं न मम इति। अग्न आयूंषि पवसे। अग्निरृषिः
अग्ने पवस्व। प्रजापते हिरण्यगर्भः प्रजापति स्त्रिष्टुप् ॐ प्रजापते न त्व० ततो ब्रह्मा शीतोष्णाभ्यां वारिणा पा
त्राभ्यां पृथगानीय बटोः पश्चिमे स्थित्वा तदुदकमन्यस्मिन्पात्रे ॐ उष्णेन वाय उदकेनेहीति युगपन्निनी
रध्यावाय तदेकदेशं गृहीत्वा नवनीतेन दधिद्रप्सेन वा मिश्रयित्वा बटोर्वाम श्मश्रुप्रदेशमारभ्य प्रदक्षिणं ॐ
अदितिः श्मश्रूणि वपत्वाप उंदंतु जीवसे इति मंत्रं प्रतिछेदनमावर्तयेत्। त्रिवारं श्मश्रूण्येवं कृते दर्शयेत्। स्वहस्त ५

स्थितेभ्य एकविंशतिकुशांकुरेभ्यस्त्रीनंकुरानादाय दक्षिणश्मश्रुभागे ब्रह्मचार्यभिमुखं पश्चिमाग्रं निदध्यात्।
तदा ब्रह्मचारी ओषधे त्रायस्वमामिति जपेत्। ततो ब्रह्मा तेष्वंकुरेषु ताम्रमयं क्षुरं निदध्यात्। तदा ब्रह्मचारी स्वधिते मा
मा हिंसीः। ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथा
सदिति जपेत्। ततो ब्रह्मचारिणा येनावपत्सवितेति मंत्रे उच्चारिते ब्रह्मा श्मश्रुकांकुरांकुशांकुरान्छित्वा तानंकुरान्ग्राम
यावच्छरावस्थशमीपर्णैः सहीकृत्य मातुः करे दद्यात्। सा च तान्सश्मश्रुशमीपर्णकुशांकुरानानडुहे गोमये निदध्यात्।
एवं द्वितीयादिच्छेदनेषु कुशांकुरत्रयनिधानादि समंत्रकं कुर्यात्। छेदनमंत्रेषु विशेषः। येन धाता बृहस्पते ०२ येन भूयश्च०३
एवं दक्षिणश्मश्रुभागे चत्वारि छेदनानि कृत्वोत्तरश्मश्रुभागेप्यनया रीत्या त्रीणि छेदनानि प्रत्येकं मंत्रैः कुर्यात्। न तु
सर्वमंत्रैश्चतुर्थं। ततः यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि श्मश्रूणि। शुंधि शिरो मुखं ममायुः प्रमोषीरि
त्यनेनायतन आरभ्य मूलमवमज्य नापितमाहूय शीतोष्णाभिरद्भिरर्थकुर्वाणः सण्वन्नकुशलीकुर्विति श्मश्रुलो
मनखान्युदकसंस्थानि कुर्वित्ति प्रेषेणानुशास्य प्रैषार्थं चावबोध्य नापितेन सर्वावशेषितशीतोष्णाभिरद्भिः
कृतकेशश्मश्रुलोमनखान्युदकसंस्थानि वापयित्वा तद्व्रीह्यादिशरावचतुष्टयं नापिताय दद्यात्। ततः करं
जबीजपिष्टेन स्वशरीरमुद्वर्त्य शीतोष्णोदकैः स्नात्वाद्विराचम्य पुनर्वेष्टितं कं गवा एकं वस्त्रं समंत्रकं परिधाया
न्यदुत्तरीयं प्रावृणुयात्। तत्र मंत्रः। युवं वस्त्राणीत्यस्य दीर्घतमा मित्रावरुणौ त्रिष्टुप् वासोदाने विनि० ॐ युवं वस्त्राणि पी०
ततो द्विराचम्य पाणिनांजनमादाय अश्मनस्तेजोऽसि चक्षुर्मे पाहि इति मंत्रेणाहृत्या सव्यदक्षिणे चक्षुषी क्रमेण स्नात
येच्च। ॐ अश्मनस्तेजोऽसि श्रोत्रं मे पाहीति अनेन कुंडलाभ्यां दक्षिणसव्ये श्रोत्रे अलंकृत्य कुंकुमाद्यनुलिप्तहस्ताभ्यां पाणि
भ्यां पूर्वं मुखमनुलिप्य पश्चादितराण्यंगान्यनुलिप्य करौ प्रक्षाल्य। ॐ अनातेस्यनाहं भूयासं इत्यनेन शिर

सिबध्वा। ॐ देवानां प्रतिष्ठेस्थौ स्थः सर्वतो मां पातु मित्यनेन चर्ममय्यावुपानहौ दक्षिणसव्याभ्यां पादाभ्यामारुह्य।
ॐ दिवश्छदमसि इति मंत्रेण छत्रं धृत्वा। वैणुरसि वानस्पत्योसि सर्वतो मा पाही वैणवं दंडं गृहीत्वा। आयुष्यमिति सूक्ते
नस्य वर्णमणिं कंठे बध्नीयात्। आयुष्यमिति सूक्तस्य सनकः सनंदनः सनातनादय ऋषयः। हिरण्यं देवता। आ
द्यास्तिस्रोनुष्टुभः। पंचमी त्रिष्टुप् सप्तमी शक्वरी अष्टमी नवम्यौ त्रिष्टुभौ दशम्यनुष्टुप् एकादशी जगती। कंठे मणि
बंधे विनियोगः। ॐ आयुष्यं वर्चस्यं रायस्पोषं०। अनंतरमुष्णीषेण शिरो दक्षिण्येन शिरः संवेष्ट्य उपानहौ सत्यज्य
पाणिनि हितां प्रागुक्तसमिधं गृहीत्वा तिष्ठन्नेव स्मृतं च म इत्यादीन्मंत्रान्स्वाहांतानुक्त्वाग्नावादध्यात्। एषां मंत्रा
णां पतिरग्निरृषिः समिदाधाने। स्मृतं च मे अस्मृतं च मे तन्म उभयं व्रतं। निंदा च० विद्या च श्रद्धा च प्रज्ञा च
इष्टं च दत्तं च अधीतं च मे अनधीतं च मे तन्म०। कृतं च सत्यं च श्रुतं च व्रतं च। यदग्ने सेंद्रस्य सप्रजापति सदेवस्य म०
सऋषिक० सपितृ० समनु० साकाशस्य० सदेवमनुष्यस्येत्यादि स्वाहा अग्नय इदं न मम। अथोपविश्यान्याः प्रदेशमा
मितादश समिधो ममाग्ने वर्चो विहवेष्वित्यनेन सूक्तेन ऋगंते ग्नावादध्यात्। पश्चात् स्वाहाकारमुच्चारयेत्॥
अस्य सूक्तस्य विहव्य ऋषिः। विश्वेदेवा देवता आद्यास्त्रिष्टुभोंत्या जगती समिदाधाने विनि०। ॐ मम अग्ने वर्चो वि०
विश्वेभ्यो देवेभ्यः स्वाहा इदं न ममेति। एवमग्रेपि त्यागः। मम देवा विहवे मयि देवाः महाव्याहृतीः देवीः षडुर्वीः अग्ने नेमं
धाता धातृणां गुरुव्यचा येन सप० अर्वाञ्चमिंद्र० १०। इति दशमंत्राः ततः स्विष्टकृदादिहोमशेषं समापयेत्॥ कू
ततः स्नातो न कौपीनं विना न नग्नश्च न स्नामि। नग्नां स्त्रियं नेक्षे। वर्षति न धावामि। वृक्षं नारोहामि। कू
पं नावरोहामि। प्राणसंशयं नाप्युपपद्ये इत्येवं संकल्पयेत्। ततः कौपीनं मेखलां च विसृजेत्। केशश्मश्रुलो
मनखान्यपराजितायां दिशि निखनेत्। ततो यत्र मधुपर्कादिपूजासंभाविता न तत्रैतां रात्रिं वसेत्। समा
वर्तनानंतरं त्रिरात्रमाशौचं कुर्यात्॥ इति प्रयोगरत्ने समावर्तनप्रयोगः। वाळवाखव्य केशवस्य पुस्तकं॥ ६